http://www.a2zSubjects.com

# MP BOARD CLASS 10 PAPER 2016

समय : घण्टात्रयम् ] **संस्कृत (सामान्य) : कक्षा X** [ पूर्णांक : १००

**प्रश्न १. उचित विकल्पं चित्वा लिखत—** १ × ५ = ५

(क) "तत् + लीनः" इत्यस्य सन्धिः अस्ति—
(अ) तन्लीनः (ब) तल्लीनः
(स) तदलीनः (द) तनलीनः।

**(ख) विसर्गसन्धिः अस्ति—**
(अ) नमस्ते (ब) नयन
(स) नास्ति (द) नैक।

**(ग) "दिगम्बरः" इत्यस्य सन्धिविच्छेदः अस्ति—**
(अ) दिग + अम्बरः (ब) दिक + अम्बरः
(स) दिशा + अम्बरः (द) दिक् + अम्बरः।

**(घ) "इत्यलम्" इत्यस्मिन् पदे सन्धि अस्ति—**
(अ) गुणसन्धिः (ब) दीर्घसन्धिः
(स) यण्सन्धिः (द) वृद्धिसन्धिः।

**(ङ) अधोलिखितेषु अव्ययं नास्ति—**
(अ) तत्र (ब) अत्र
(स) सत्र (द) यत्र।

उत्तर—(क) (ब), (ख) (अ), (ग) (द), (घ) (स), (ङ) (स)।

**प्रश्न २. उचित विकल्पं चित्वा लिखत—** १ × ५ = ५

**(क) "रामलक्ष्मणौ" इत्यस्मिन् पदे समासः अस्ति—**
(अ) तत्पुरुष समासः (ब) द्विगु समासः
(स) द्वन्द्व समासः (द) कर्मधारय समासः।

**(ख) नञ्तत्पुरुष समासस्य उदाहरणम् अस्ति—**
(अ) अब्राह्मणः (ब) सुब्राह्मणः
(स) कुब्राह्मणः (द) नरब्राह्मणः।

**(ग) बहुव्रीहि समासस्य उदाहरणम् अस्ति—**
(अ) दीनदानम् (ब) सचक्रम्
(स) कृष्णसर्पः (द) पीताम्बरः।

**(घ) अधोलिखितेषु उपसर्गः अस्ति—**
(अ) अस् (ब) अप
(स) अरि (द) अज।

**(ङ) 'दुष्कर्मः' इत्यस्मिन् पदे उपसर्गः अस्ति—**
(अ) दुः (ब) दुष
(स) दुष्क (द) दुस्।

उत्तर—(क) (स), (ख) (अ), (ग) (द), (घ) (ब), (ङ) (द)।

**प्रश्न ३. उचित विकल्पं चित्वा लिखत—** १ × ५ = ५

**(क) "पक्ष्यसि" इत्यस्मिन् पदे धातुः अस्ति—**
(अ) पक्ष् (ब) पच्
(स) पश् (द) पक्ष्य्।

**(ख) 'याचतु' इत्यस्मिन् पदे वचनम् अस्ति—**
(अ) एकवचनम् (ब) द्विवचनम्
(स) बहुवचनम् (द) अवचनम्।

**(ग) 'अपश्यन्' इत्यस्मिन् पदे लकारः अस्ति—**
(अ) लोट्लकारः (ब) लृट्लकारः
(स) लङ्लकारः (द) लट्लकारः।

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com

http://www.a2zSubjects.com

(घ) 'भविष्यतः' इत्यस्मिन् पदे पुरुषः अस्ति—
(अ) उत्तमपुरुषः (ब) प्रथमपुरुषः
(स) मध्यमपुरुषः (द) सुपुरुषः।

(ङ) 'विद्या माता इव रक्षति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति—
(अ) माता (ब) विद्या
(स) रक्षति (द) इव।

उत्तर—(क) (ब), (ख) (अ), (ग) (स), (घ) (ब), (ङ) (द)।

प्रश्न ४. उचित विकल्पं चित्वा लिखत— १ × ५ = ५

(क) 'ल्यप्' प्रत्ययस्य उदाहरणमस्ति—
(अ) आगत्य (ब) आगम
(स) आयात (द) आतप।

(ख) 'उक्तवान्' इत्यस्मिन् पदे प्रत्ययः अस्ति—
(अ) क्त (ब) तव्यत्
(स) क्तवतु (द) क्त्वा।

(ग) 'अज + टाप्' इत्यस्य पदम् भविष्यति—
(अ) अजटा (ब) अजा
(स) अजटाप् (द) अटाप्।

(घ) 'तुमुन्' प्रत्ययस्य उदाहरणं नास्ति—
(अ) नेतुम् (ब) जेतुम्
(स) कर्तुम् (द) पठतु।

(ङ) परसदननिविष्टः को ................ न याति।
(अ) लघुत्वं (ब) महत्वं
(स) पुरातत्वं (द) गुरुत्वं।

उत्तर—(क) (अ), (ख) (स), (ग) (ब), (घ) (द), (ङ) (अ)।

प्रश्न ५. प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत— १ × ५ = ५

*(प्राणैः, मनः, आत्मा, पितृसमः, निष्क्रियाणां)*

(क) तन्मे ................ शिवसङ्कल्पमस्तु।
(ख) ज्येष्ठो भ्राता ................ ।
(ग) कर्मभूमिः ................ भारं वोढुम् नेच्छति।
(घ) परोपकारः कर्तव्यः ................ कण्ठगतैरपि।
(ङ) सर्वेषु शरीरेषु ................ एक एव।

उत्तर—(क) मनः, (ख) पितृसमः, (ग) निष्क्रियाणां, (घ) प्राणैः, (ङ) आत्मा।

प्रश्न ६. अधोलिखितप्रश्नानां उत्तराणि एकवाक्येन लिखत— (कानि त्रीणि)— २ × ३ = ६

(क) सुतापेक्षी कः आसीत् ?
(ख) वृक्षस्य आधारभूता का ?
(ग) कः मृतोऽपि जीवति ?
(घ) कृषिवलैः काः समेधिता भवन्तु ?
(ङ) छत्रसालः कस्य शिष्य आसीत् ?
(च) मैत्रेयी सीतां केषां ज्ञानं दत्तवती ?

प्रश्न ७. अधोलिखितेषु द्वयोः शब्दयोः शब्द रूपाणि त्रिषु वचनेषु लिखत— २

(क) राम — सप्तमी विभक्तिः

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com

| | | | |
|---|---|---|---|
| | (ख) कवि | — | चतुर्थी विभक्तिः |
| | (ग) युष्मद् | — | प्रथमाविभक्तिः |
| उत्तर— | (क) रामे | रामयोः | रामेषु |
| | (ख) कवये | कविभ्याम् | कविभिः |
| | (ग) त्वम् | युवाम् | यूयम् |

**प्रश्न ८. 'तस्याम्' *अथवा* 'पित्रा' इति पदस्य विभक्तिं वचनं च लिखत।** २

उत्तर— तस्याम्—सप्तमी विभक्ति : एकवचनं च।

पित्रा —तृतीया विभक्ति : एकवचनं च।

**प्रश्न ९. अधोलिखित गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि—**

२ × ५ = १०

**(क)** ततोऽसौ देशाद्देशान्तरं विचरन् व्याकरणवेदान्तादीत्यनेक शास्त्राणि विशेषतः योगपद्धतिं च अशिक्षत। विचरणकालेऽयं नर्मदातीरे स्वामि पूर्णानन्दसरस्वती सकाशात् संन्यासमगृहणात् तदा एषः "दयानन्दसरस्वतीति" नाम्ना प्रसिद्धः जातः। अनन्तरं मथुरां गत्वा प्रज्ञाचक्षुषः स्वामिनः विरजानन्दात् बहुविधानि शास्त्राणि अशिक्षत।

**(i) मूलशङ्करः कुत्र विचरन् व्याकरणवेदान्तादीनि शास्त्राणि अशिक्षत ?**

**(ii) अयं कस्य सकाशात् सन्यासमगृहणात् ?**

**(iii) तदा एषः किम् नाम्ना प्रसिद्ध जातः ?**

**(iv) प्रज्ञाचक्षु स्वामी कः आसीत् ?**

**(v) अनन्तरं कुत्र गत्वा सः बहुविधानि शास्त्राणि अशिक्षत ?**

**(ख)** "सरल संस्कृतमेव भारतराष्ट्रस्य राष्ट्रभाषा भवेत्।" अयमेव भावः श्रीमातुः कथनेऽपि दृश्यते सा "संस्कृतमेवराष्ट्रभाषा भवितुम् अर्हति" इत्युक्तवती। अन्येऽपि प्रसिद्धाः नायकाः संस्कृतस्य प्रशंसां कृतवन्तः महनीयतां च स्वीकृतवन्तः। यथा-प्रथमः राष्ट्रपतिः डा. राजेन्द्र प्रसाद कथितवान् यत् "संस्कृतसाहित्यं न केवलं भारतस्य कृते अपितु मानवजातेः कृते अमूल्यधनम् अस्ति।"

**(i) सरल संस्कृतमेव भारतराष्ट्रस्य किं भवेत् ?**

**(ii) "संस्कृतमेव राष्ट्रभाषा भवितुमर्हति" इति का उक्तवती ?**

**(iii) प्रसिद्धाः नायकाः कस्य प्रशंसां कृतवन्तः ?**

**(iv) भारतस्य प्रथम राष्ट्रपतिः कः आसीत् ?**

**(v) संस्कृतसाहित्यं मानवजातेः कृते किं अस्ति ?**

**(ग)** मध्यप्रदेशस्य नगरीयं पौराणिकी ऐतिहासिकी च वर्तते। विदिशा पूर्वस्मिन् काले 'भेलसा' इति नाम्ना सुविख्याता आसीत्। एतस्य कारणं सूर्यदेवतायाः मन्दिरस्य 'भेल्लस्वामिनः' इति लोकख्यातिरेव। पुरा विदिशानगरी समुन्नतमेकं वाणिज्यिकं केन्द्रमासीत्। योगदर्शनस्य प्रणेता व्याकरणमहाभाष्यस्य कर्ता महर्षिः पतञ्जलिः सम्राट् अशोकोऽपि विदिशाया सह सम्बद्धौ आस्ताम्।

**(i) मध्यप्रदेशस्य का नगरी पौराणिकी ऐतिहासिकी च वर्तते ?**

**(ii) विदिशा प्राचीनकाले कया नाम्ना सुविख्याता आसीत् ?**

**(iii) 'भेल्लस्वामिनः' इति कस्य मन्दिरस्य लोकख्यातिः ?**

**(iv) पुरा विदिशानगरी कीदृशं केन्द्रमा आसीत् ?**

**(v) पतञ्जलिः कः आसीत् ?**

**प्रश्न १०. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत—**

२ × ५ = १०

**(क)** *केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः, न स्नानं न विलेपनं न कुसुमं नालङ्कता मूर्धजाः।*
*वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते, क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥*

http://www.a2zSubjects.com

http://www.a2zSubjects.com

(i) चन्द्रोज्ज्वलाः हाराः कं न विभूषयन्ति ?
(ii) वाण्येका पुरुषं किं करोति ?
(iii) कानि खलु क्षीयन्ते ?
(iv) सततं भूषणं किम् ?
(v) 'सततं' इति शब्दस्य समानार्थी पदं लिखत।

(ख) *मत्ता गजेन्द्रा मुदिता गवेन्द्रा*
*वनेषु विक्रान्ततरा मृगेन्द्राः*
*रम्या नगेन्द्रा निभृता नरेन्द्राः*
*प्रक्रीडितो वारिधरैः सुरेन्द्रः॥*

(i) मत्ताः के ?
(ii) गवेन्द्राः कीदृशा : भवन्ति ?
(iii) वनेषु विक्रान्तरा के ?
(iv) के निभृताः सन्ति ?
(v) सुरेन्द्रः कैः सह प्रक्रीडितः ?

(ग) *दरिद्रता धीरतया विराजते,*
*कुवस्त्रता शुभ्रतया विराजते।*
*कदन्नता चोष्णतया विराजते,*
*कुरूपता शीलतया विराजते॥*

(i) दरिद्रता कया विराजते ?
(ii) कुवस्त्रता कया विराजते ?
(iii) कदन्नता कया विराजते ?
(iv) शीलतया का विराजते ?
(v) कुरूपता कया विराजते ?

प्रश्न ११. युग्म मेलनं कुरुत— ४

| (अ) | (ब) |
|---|---|
| (i) प्राचीनः | (क) महाभारतम् |
| (ii) नानृतम् | (ख) न्यग्रोधवृक्षः |
| (iii) वेदव्यासः | (ग) कर्तव्यः |
| (iv) अधिकः मूल्यवान् | (घ) ब्रूयात् |
| | (ङ) समयः |

उत्तर—(i) → (ख), (ii) → (घ), (iii) → (क), (iv) → (ङ)।

प्रश्न १२. शुद्धवाक्यानां समक्षं "आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत— ४

(i) सूर्यदेवः वृष्टिं वर्षति।
(ii) यूथाद भ्रष्ट दासेरकः घण्टां वादयन्नागच्छति।
(iii) यशोधरा राहुलस्य माता आसीत्।
(iv) रघुः वरतन्तुशिष्यः आसीत्।

http://www.a2zSubjects.com

उत्तर—(i) न, (ii) आम्, (iii) आम्, (iv) न।

प्रश्न १३. अधोलिखित प्रश्नेषु चतुर्णां प्रश्नानाम् संस्कृतभाषायाम् उत्तराणि एकपदेन लिखित— १ × ४ = ४

(i) मनः जाग्रतः कुत्र उदैति ?
(ii) आत्महिताय किम् अनुष्ठेयम् ?

http://www.a2zSubjects.com

http://www.a2zSubjects.com

http://www.a2zSubjects.com

(iii) का रूपं नाशयिष्यति ?

(iv) जलं विना किं न सम्भवम् ?

(v) छत्रसालस्य पितुः नाम् किम् ?

(vi) अनर्घशीलः कः ?

उत्तर—(i) दूरम्, (ii) सद्वृत्तम्, (iii) जरा, (iv) जीवनम्, (v) श्रीचम्पतरायः, (vi) रघुः।

**प्रश्न १४. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत।** ४

**प्रश्न १५. स्वस्य प्राचार्यस्य कृते छात्रवृत्यर्थं प्रार्थनापत्रं लिखत।** ४

*अथवा*

**स्वस्य मित्रस्य कृते अध्ययनं वर्णयन् एकं पत्रं संस्कृते लिखत।**

**प्रश्न १६. अधोलिखितेषु "पञ्च" अशुद्धकारकवाक्यानां शुद्धिः करणीया—** ५

(i) नृपः विप्रम् धनं ददाति।

(ii) श्रीगुरुं नमः।

(iii) एका बालकः पठति।

(iv) सीता रामस्य सह वनं गता।

(v) अहं पाठशालां गच्छामः।

(vi) ग्रामस्य अभितः जनाः भ्रमन्ति।

(vii) गङ्गा हिमालये प्रभवति।

**प्रश्न १७. अधोलिखित वाक्यानां कथानुसारेण क्रम संयोजनं कुरुत—** ५

(i) सगरस्य वंशे भगीरथस्य जननम् अभवत्।

(ii) सूर्यवंशस्य राजा सगरः आसीत्।

(iii) भगीरथः नदीं भूमितः पातालं नीतवान्।

(iv) सगरपुत्राः स्वर्गलोकं गतवन्तः।

(v) कुपितः मुनिः तान् सगरपुत्रान् क्रोधाग्निना दग्धवान्।

उत्तर—(ii) → (v) → (i) → (iii) → (iv)।

**प्रश्न १८. अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत—** ५

स्वस्थशरीरे एव स्वस्थाबुद्धिः वसति। स्वस्था बुद्धि एव स्वस्थविचाराणां जननी अस्ति। व्यायामशीलः मनुष्य एवनीरोगः चिरंजीवी च भवति। व्यायामशीलाः मनुष्याः प्रायेण रुग्णाः न भवन्ति। विविध रोगाणां चिकित्सा अपि व्यायामेन सम्भवति। अतः जीवनस्य कृते व्यायामः परमावश्यकः।

(क) उपर्युक्त गद्यांशस्य उचित शीर्षकं लिखत।

(ख) स्वस्था बुद्धि कुत्र वसति ?

(ग) का स्वस्थविचाराणां जननी अस्ति ?

(घ) कः एव नीरोगः ?

(ङ) विविध रोगाणां चिकित्सा केन सम्भवति ?

**प्रश्न १९. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायाम् निबन्धं लिखत—** १०

(क) उत्सवः,

(ख) मम दिनचर्या

(ग) संस्कृतभाषायाः महत्त्वम्,

(घ) अनुशासनम्।

---

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com